॥ लघुवायुस्तुतिः ॥

वासुदेवं सदानन्दतीर्थानन्दसन्दोहसन्दानशीलम् ।
स्वामिनं सच्चिदानन्दरूपं नन्दयामोवयं नन्दसूनुम् ॥ १॥

श्रीहनूमन्तमेकान्तभाजं राघवश्रीपदाम्भोजभृङ्गम् ।
मारुतिं प्राणिनां प्राणभूतं नन्दयामोवयं नन्दितीर्थम् ॥ २॥

भीमरूपं परो पेयिवांसं भारतं भारतश्रीललामम् ।
भूभरध्वंसिनां भारतीशं नन्दयामोवयं नन्दितीर्थम् ॥ ३॥

देवचूडामणिं पूर्णबोधं कृष्णपादारविन्दैकदासम् ।
चित्तचिन्तामणिं पुण्यभाजां नन्दयामोवयं नन्दितीर्थम् ॥ ४॥

मायिगोमायुमायान्धकार ध्वंसमार्ताण्ड मूर्तीयमानम् ।
सज्जनानन्दसन्दोहधेनुं नन्दयामोवयं नन्दितीर्थम् ॥ ५॥

इन्दिरानन्दमानन्दमूर्तिं सुन्दरीमन्दिरामिन्दुकान्तिम् ।
दासमेकं तथा तत्त्वरूपं नन्दयामोवयं नन्दितीर्थम् ॥ ६॥

इति श्रीकल्याणीदेवी विरचितं लघुवायुस्तुतिः सम्पूर्णम्

॥ भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु॥